९

गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।अग्निः। त्रिष्टुप्

**नि होता होतृषदने विदानस्त्वेषो दीदिवाँ असदत्सुदक्षः।**

**अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रम्भरः शुचिजिह्वो अग्निः॥ २.००९.०१**

होता- देवाह्वाता। विदानः- ज्ञानी। त्वेषः- प्रवृद्धः। दीदिवान्- दीप्तः। सुदक्षः- सुसमर्थः। अदब्धव्रतप्रमतिः- अहिंसनीयधर्मयुक्तप्रकर्षमतिः। वसिष्ठः- शरण्यः। सहस्रंभरः- प्रभूतधारकः। शुचिजिह्वः- पवित्रज्वालायुक्तः। अग्निः- पावकः सर्वभूतहितरत्युद्भूतसङ्कल्पः। होतृसदने- देवाह्वातुः सद्मनि। नि असदत्- नितरां सीदतु ॥१॥

**त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता।**

**अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपाः॥ २.००९.०२**

त्वम्। दूतः- देवेभ्योऽस्मद्दत्तहव्यप्रापकः। त्वम्। नः- अस्माकम्। परस्पाः- पारयिता। वृषभ- हे वर्षक। त्वम्। वस्यः- सम्पदः। आ- आभिमुख्येन। प्रणेता। अग्ने। नः- अस्माकम्। तोकस्य तने तनूनाम्- सन्ततेर्देहेषु। अप्रयुच्छन्- अप्रमाद्यन्। गोपाः- पालकः सन्। दीद्यत्- ज्वलन्। बोधि- जागृहि ॥२॥

**विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे।**

**यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे॥ २.००९.०३**

अग्ने। ते- तुभ्यम्। परमे जन्मन्- दिवि। विधेम- परिचरेम। स्तोमैः- मन्त्रैः। अवरे सधस्थे- भूमौ। विधेम- परिचरेम। यस्मात्। योनेः- मूलात्। उदारिथ- उद्गतः। तम्। यजे- पूजयामि। समिद्धे- सम्यगुद्दीपिते। त्वे- त्वयि। हवींषि- चरुपुरोडाशध्यानभावनादिहव्यानि। प्र- प्रकर्षेण। जुहुरे- जुह्वति ॥३॥

Dr. Rangaji

WEBOLIM

**अग्ने यजस्व हविषा यजीयाञ्छ्रुष्टी देष्णमभि गृणीहि राधः।**

**त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता॥ २.००९.०४**

अग्ने। यजीयान्- पूज्यः सङ्गतिकारकः सन्। हविषा- चरुपुरोडाशध्यानभावनादिहव्येन। यजस्व- उपास्व। श्रुष्टी- क्षिप्रम्। देष्णम्- देयाम्। राधम्- संसिद्धिम्। राध संसिद्धौ। अभि गृणीहि- ब्रूहि। त्वम्। रयीणां रयिपतिः- महासम्पत्पालकः। असि- भवसि। त्वम्। शुक्रस्य- दीप्तिमतः। वचसः- मन्त्रस्य। मनोता- प्रज्ञाता ॥४॥

**उभयं ते न क्षीयते वसव्यं दिवेदिवे जायमानस्य दस्म।**

**कृधि क्षुमन्तं जरितारमग्ने कृधि पतिं स्वपत्यस्य रायः॥ २.००९.०५**

दस्म- दर्शनीय। दिवेदिवे- प्रतिदिनम्। जायमानस्य- उद्भूतस्य। ते- तव। वसव्यम्- शरण्यम्। उभयम्- दिव्यं भौमम्। न क्षीयते। अग्ने। जरितारम्- रसनिष्पादकम्। क्षुमन्तम्- मन्त्रविदम्। कृधि- कुरु। स्वपत्यस्य- शोभनसन्ततेः। रायः- दानयोग्यधनस्य। पतिम्- स्वामिनम्। कृधि- कुरु ॥५॥

**सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति।**

**अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि॥ २.००९.०६**

सः- तादृशस्त्वम्। एना- अनेन। अनीकेन- गणेन। सुविदत्रः- शोभनधनः। अस्मे- एतस्मै यजमानाय। देवान् यष्टा- देवपूजकः। स्वस्ति- भद्रम्। आयजिष्ठः- पूज्यतमः। अदब्धः- अहिंसनीयः। गोपाः- पालकः। उत- अपि च। नः- अस्माकम्। परस्पाः- पारयिता। अग्ने। द्युमत्- दीप्तिमत्। उत- अपि च। रेवत्- दानयोग्यधनम्। दीदिहि- उद्दीपय ॥६॥

Dr. Ranganji

WEBOLIM